**आदर्शप्रश्नपत्रम्**

**HPBOSE DHARAMSHALA**

**शिक्षा-सत्र- 2026-2027**

**कक्षा नवमी**

**समयः होरात्रयम्** **विषयः संस्कृतम्** **पूर्णांकाः 80**

## खण्ड 'क'

## बहुविकल्पात्मक-प्रश्नाः

**अधोलिखित-षोडश-प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत। 1×16=16**

**प्रश्न-1. शेमुषी (प्रथमो-भागः) इत्यस्य नवम: पाठः कः?**

(A) भ्रान्तो बालः (B) पर्यावरणम् (C) लौहतुला (D) सिकतासेतुः

**प्रश्न-2. 'धेनुः' इत्यस्य शब्दस्य कोऽर्थः?**

(A) गर्दभः (B) वृषभः (C) महिषी (D) गौः

**प्रश्न-3. "वक्तव्यम्, कर्तव्यम्, सर्वस्वम्, हन्तव्यम्।" इत्यत्र भिन्नप्रकृतिकं पदं चित्वा लिखत।**

(A) वक्तव्यम् (B) कर्तव्यम् (C) सर्वस्वम् (D) हन्तव्यम्

**प्रश्न-4. मनः कीदृशं भवति?**

(A) तेजोमयम् (B) अन्नमयम् (C) आपोमयम् (D) प्राणमयम्

**प्रश्न-5. 'स्थले चरन्ति इति'' इत्यस्य कृते एकपदवाचि-पदं चिनुत।**

(A) स्थलचराः (B) जलचराः (C) निशाचराः (D) नभचराः

**प्रश्न-6.** तत्र <u>श्रेष्ठ+इन्</u> तारस्वरेण अवदत्-" भोः! वञ्चितोऽहम्!

(A) श्रेष्ठन् (B) श्रेष्ठिन् (C) श्रेष्ठी (D) श्रेष्ठिन:

**प्रश्न-7.** एकदा माता स्थाल्यां तण्डुलान् <u>निक्षिप्य</u> पुत्रीम् आदिशत्।

(A) नि +क्षिप्+यत् (B) नि +क्षिप्+ल्यप् (C) निक्षिप्+यत् (D) निक्षिप्य +अ

**प्रश्न-8. अहं गीतं गायामि।**

(A) मया गीतानि गीयन्ते। (B) मया गीतं गीयते। (C) अहं गीतं गायसि। (D) अहं गीतं गीयते।

**प्रश्न-9. रामेण फलं खाद्यते।**

(A) रामेण फलं खाद्यते। (B) रामेण फलं खाद्यन्ते। (C) राम: फलं खादसि। (D) राम: फलं खादति।

**प्रश्न-10.** समुद्रमासाद्य <u>भवन्त्यपेयाः</u>।

(A) भवन्ति+अपेयाः (B) भवन्त्य+पेयाः (C) भवन्त्+अपेयाः (D) भवन्ति+पेयाः

**प्रश्न-11. रामः .......... पुत्रः आसीत्।**

(A) दशरथस्य (B) दशरथः (C) दशरथाय (D) दशरथे

**प्रश्न-12. माता सर्वाणि कार्याणि ..........।**

(A) कुर्वन्ति (B) करोति (C) करिष्यन्ति (D) करोषि

**प्रश्न-13.** <u>मतयः</u> इत्यस्य पद-परिचयम्-

(A) मति शब्दः, तृतीया विभक्तिः, एकवचनम्। (B) मति शब्दः, षष्ठी विभक्तिः, एकवचनम्।
(C) मति शब्दः, द्वितीया विभक्तिः, बहुवचनम्। (D) मति शब्दः, प्रथमा विभक्तिः, बहुवचनम्।

**प्रश्न-14. <u>क्रीडावः</u> इत्यस्य पद-परिचयम्-**

(A) क्रीड् धातुः, लट्लकारः, उत्तम-पुरुषः, बहुवचनम्। (B) क्रीड् धातुः, लृट्लकारः, उत्तम-पुरुषः, बहुवचनम्।
(C) क्रीड् धातुः, लट्लकारः, उत्तम-पुरुषः, द्विवचनम्। (D) क्रीड् धातुः, लोट्लकारः, उत्तम-पुरुषः, द्विवचनम्।

**प्रश्न-15. विरमन्तु एते वराकाः <u>पुस्तकदासाः</u>।**

(A) पुस्तकस्य दास: (B) पुस्तकदास: (C) पुस्तके दासाः (D) पुस्तकानां दासाः

**प्रश्न-16. संस्कृते ............... कारकाणि सन्ति।**

(A) त्रयः (B) सप्त (C) षड् (D) पञ्च

## खण्ड 'ख'

# अपठित-अवबोधनम्

**प्रश्न-17. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

**पञ्चदश-शताब्द्यां निर्मितं 'लोधी गार्डन' इति प्रसिद्धम् उपवनं नवदेहलीक्षेत्रे स्थितमस्ति। नवति-एकड-परिमितं बृहदाकारकम् इदमुपवनम्। अत्र शताधिक-वर्षेभ्यः प्राचीनाः पादपाः सन्ति। तेषु वटवृक्षः, अश्वत्थः, निम्बः, किंशुकः, आम्रम्, देवदारुः, इंगुदीः, सिंसपाः, आमलकवृक्षः, बिल्वः, अर्जुनः च प्रमुखाः सन्ति। सरणिषु स्थिताः वृक्षाः दर्शकानां मनांसि हरन्ति। प्रतिदिनं सहस्रशः जनाः अत्र विहाराय आगच्छन्ति। लक्षशः खगाश्च अत्राश्रयं प्राप्नुवन्ति।**

**इदम् उपवनम् चतुर्भागेषु विभक्तम्। एकत्र पुष्पारामः विराजते। अस्मिन् आरामे मुख्यतया पाटलम्, नवमल्लिका, उत्पलम्, जपाकुसुमम्, शेफालिका, बकुलपुष्पम्, रजनीगन्धा, यूथिका च सन्ति। पुष्पाणां शोभा दर्शकानां मनः प्रसादयति। मधुगन्धिनः भ्रमराः पुष्पेषु डयन्ते। पुष्पेभ्यः मधुररसं नीत्वा मधुमक्षिकाः मधुसञ्चयं कुर्वन्ति। अस्मिन् उपवने विद्युन्निर्झराः वातावरणं मनोहरम् शीतलञ्च कुर्वन्ति। अत्र भ्रान्त्वा रुग्णाः अपि जनाः स्वास्थ्यलाभं कुर्वन्ति। कदाचिदस्माभिः अत्र भ्रमणाय गन्तव्यमेव।**

**(1) एकपदेन उत्तरत –** **1×2=2**

**(क)** भ्रमराः कुत्र डयन्ते?

**(ख)** लोधीगार्डन' इति उपवनं कति भागेषु विभक्तम्?

**(2) पूर्णवाक्येन उत्तरत –** **1×2=2**

**(क)** पुष्पारामे उपलब्धानां केषाञ्चित् पुष्पाणां नामानि लिखत।

(ख) लोधी-गार्डन' इति नामके उपवने के प्रमुखाः वृक्षाः सन्ति?

**(3) निर्देशानुसारं उत्तरत –** **1×3=3**

**(क) 'मधुगन्धिनः भ्रमराः'** अत्र किं विशेष्यपदं प्रयुक्तम्?

**(ख) 'स्वस्थाः'** इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

**(ग) 'सहस्रशः जनाः भ्रमणाय आगच्छन्ति'** अत्र कर्तृपदं किम्?

**(4) प्रदत्त-गद्यांशस्य उचितं शीर्षकं लिखत।** **1×1=1**

**(5) उपरोक्त-गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत।** **2×1=2**

## खण्ड 'ग'

# रचनात्मक-कार्यम्

**प्रश्न-18. भवान् प्रथमसत्रपरीक्षायाम् उत्तमाङ्कान् प्राप्तवान् इति वर्णयन् मित्रं प्रति मञ्जूषायाः सहायतया पत्रं लिखतु। ½×10=5**

| |
|---|
| **समयानुसारिणीम्, सर्वम्, अस्तु, अङ्काः, अनुपालनम्, पृष्टम्, कारणम्, कारणात्, परीक्षापरिणामः।** |

**परीक्षाभवनतः**

**दिनाङ्क: ७ मई, २०२६**

**प्रिय मित्र,**

**नमोनमः।**

अत्र कुशलं तत्र **(1)** ...............। भवता **(2)** ............... यत् प्रथमसत्रपरीक्षायां मम परीक्षापरिणामः कीदृशः अस्ति? प्रथमसत्रपरीक्षायां मम **(3)** ............... आशानुकूलः अस्ति। अस्य **(4)** ............... एतत् अस्ति यत् मया नियमानाम् अनुपालनं कृतम्। खेलनस्य समये खेलनम्, पठनस्य समये पठनम् कृतम्। अस्मात् **(5)** ............... मया परीक्षायां शोभनाः **(6)** ............... प्राप्ताः। सत्यम् एव एतत् यदि समयस्य **(7)** ............... क्रियते तदा अस्य

परिणामोऽपि शोभनीयः भवति। भवान् अपि एवं **(8)** ............... दिनचर्याम् पालयेत्। शेषं कुशलम्। सर्वेभ्यः मम प्रणामाः।

भवतः मित्रम्
क. ख. ग.

**प्रश्न-19. अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यताम्। 5×1=5**

**(क)** मम विद्यालयः **(ख)** स्वच्छतायाः महत्त्वम् **(ग)** दीपावलिः

## खण्ड 'घ'

## अनुप्रयुक्त-व्याकरणम्

**प्रश्न-20. अधोलिखितवाक्येषु चतुर्णां रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत।**

**(क)** आरुणिः- वत्स! किमद्य त्वया <u>प्रष्टव्यम्</u> अस्ति? **1×4=4**

**(ख)** वृद्धोऽहं त्वं युवा धन्वी सरथः <u>कवच+इन्</u> शरी।

**(ग)** ते निर्गुणं <u>प्र+आप्+ल्यप्</u> भवन्ति दोषाः।

**(घ)** अस्य पुस्तकस्य <u>धार्मिकं</u> महत्त्वं विद्यते।

**(ङ)** पुत्रस्य दैन्यं <u>दृश्+क्त्वा</u> अहं रोदिमि।

**प्रश्न-21. अधोलिखित-वाक्येषु चतुर्णां वाक्यानां वाच्यस्य नियमानुगुणं समुचितं वाच्य-परिवर्तनं कुरुत। 1×4=4**

**(क)** रामः लेखं लिखति।

**(ख)** गीतया रोटिका खाद्यते।

**(ग)** सेवकः ग्रामं गच्छति।

**(घ)** त्वया वनं दृश्यते।

**(ङ)** मोहनः पाठं पठति।

**प्रश्न-22. अधोलिखित-पदेषु चतुर्णां पदानां सन्धिपदं सन्धिविच्छेदपदं वा लिखत। 1×4=4**

**(क)** विना <u>लिप्यक्षरज्ञानं</u> तपोभिरेव केवलम्।

**(ख)** तस्याः च एका दुहिता विनम्रा मनोहरा <u>चासीत्</u>।

**(ग)** सर्वैः कुटुम्बिभिः मित्रैः <u>ज्ञातिजनैः+च</u> गर्हितोऽभवम्।

**(घ)** <u>न+एतादृशः</u> स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्व दृष्टः।

**(ङ)** दिनस्य कार्यं <u>तस्मिन्नेव</u> दिने कर्तव्यम्।

**प्रश्न-23. अधोलिखितवाक्येषु वाक्यानुगुणं चतुर्णां पदानां विभक्ति-वचनम् अधिकृत्य समुचितं पदं लिखत। 1×4=4**

**(क)** ............चित्रं पश्यन्ति। **(बाला प्रथमा)**

**(ख)** ............नमः। **(तत् (पुँल्लिङ्गः) चतुर्थी)**

**(ग)** ........... ग्रामं अगच्छन्। **(ग्रामीण प्रथमा)**

**(घ)** ............वन्दनीयौ। **(गुरु प्रथमा)**

**(ङ)** ............ विद्यालयं चलिष्यावः। **(अस्मद् प्रथमा)**

**प्रश्न-24. अधोलिखितवाक्येषु वाक्यानुगुणं चतुर्णां पदानां पुरुष-वचनम् अधिकृत्य समुचितं पदं लिखत। 1×4=4**

**(क)** श्वः ते सर्वे विद्यालयम् ............। **(गम् धातुः, लृट्लकारः)**

**(ख)** छात्राः चित्रं ............। **(दृश् धातुः, लङ्लकारः)**

**(ग)** श्वः नदीतीरे वनमहोत्सवः ............। **(भू धातुः, लृट्लकारः)**

**(घ)** त्वं पाठं.........। **(पठ् धातुः, विधिलिङ्लकारः)**

**(ङ)** रामः किं कार्यं ............। **(कृ धातुः, लट्लकारः)**

**प्रश्न-25. अधोलिखित-पदेषु चतुर्णां पदानां समुचितं पद-परिचयं विधीयन्ताम्। ½×4=2**

विष्णुः, अस्मभ्यम्, नदीः, सेवन्ते, नर्तिष्यथः, अकरोत्।

**प्रश्न-26. अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहपदं वा प्रदत्त-विकल्पेभ्यः चिनुत। ½×4=2**

**(क)** सरितो **<u>गिरिनिर्झराः</u>** च अमृतस्वादु निर्मलं जलं प्रयच्छन्ति।

**(ख)** स भग्नधन्वा विरथो **<u>हताश्वः</u>** हतसारथिः।

**(ग)** **<u>न क्षीणो</u>** वित्ततः क्षीणो वृत्ततस्तु हतो हतः।

**(घ)** **<u>गुरोः गृहं</u>** गत्वैव विद्याभ्यासः करणीयः।

## खण्ड 'ङ'

# पठित-अवबोधनम्

### पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्

**प्रश्न-27. अधोलिखित-पठित-अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

परन्तु स्वार्थान्धो मानवः तदेव पर्यावरणम् अद्य नाशयति। स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति। जनाः यन्त्रागाराणां विषाक्तं जलं नद्यां निपातयन्ति। तेन मत्स्यादीनां जलचराणां च क्षणेनैव नाशो भवति। नदीजलमपि तत्सर्वथाऽपेयं जायते। मानवाः व्यापारवर्धनाय वनवृक्षान् निर्विवेकं छिन्दन्ति। तस्मात् अवृष्टिः प्रवर्धते, वनपशवश्च शरणरहिता ग्रामेषु उपद्रवं विदधति। शुद्धवायुरपि वृक्षकर्तनात् सङ्कटापन्नो जायते। एवं हि स्वार्थान्धमानवैः विकृतिम् उपगता प्रकृतिः एव सर्वेषां विनाशकर्त्री भवति। विकृतिमुपगते पर्यावरणे विविधाः रोगाः भीषणसमस्याश्च सम्भवन्ति। तत्सर्वमिदानीं चिन्तनीयं प्रतिभाति।

**(1) एकपदेन उत्तरत – 1×2=2**

**(क)** वनपशवः कुत्र उपद्रवं विदधति?

**(ख)** मानवाः किमर्थं वनवृक्षान् छिन्दन्ति?

**(2) पूर्णवाक्येन उत्तरत – 1×1=1**

**(क)** जनाः स्वल्पलाभाय किं कुर्वन्ति?

**(3) निर्देशानुसारं उत्तरत – 1×2=2**

**(क)** **'विषाक्तं जलम्'** अत्र विशेषणपदं किम् अस्ति?

**(ख)** **‘क्षणेनैव’** इत्यस्य पदस्य सन्धिविच्छेदं कुरुत।

**प्रश्न-28. अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः।।

**(1) एकपदेन उत्तरत – 1×2=2**

**(क)** सतां विभूतयः किमर्थं भवन्ति?

**(ख)** वृक्षाः स्वयं कानि न खादन्ति?

**(2) पूर्णवाक्येन उत्तरत – 1×1=1**

**(क)** के स्वयं सस्यं न अदन्ति?

**(3) निर्देशानुसारम् उत्तरत – 1×2=2**

**(क)** **'पिबन्ति'** इति क्रियापदस्य कर्तृपदं किम् अस्ति?

**(ख)** श्लोकेऽस्मिन् **'सज्जनानाम्'** इत्यर्थे किं पदं प्रयुक्तम्?

**पठित-गद्य-पद्ययोः रूपरेखा, प्रसङ्गसहितं हिन्दी-भाषायाम् अनुवादः।**

**प्रश्न-29. अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य रूपरेखा, प्रसङ्गसहितं हिन्दी-भाषायां सरलार्थं विधीयन्ताम्। (½+½+2=3)**

तदा स बालः 'अलं भाषणेन अनेन मिथ्यागर्वितेन कीटेन' इति विचिन्त्य अन्यत्र दत्तदृष्टिः चञ्च्वा तृणशलाकादिकम् आददानम् एकं चटकम् अपश्यत्, अवदत् च-"अयि चटकपोत! मानुषस्य मम मित्रं भविष्यसि। एहि क्रीडावः। एतत् शुष्कं तृणं त्यज स्वादूनि भक्ष्यकवलानि ते दास्यामि" इति। स तु "मया वटद्रुमस्य शाखायां नीडं कार्यम्" इत्युक्त्वा स्वकर्मव्यग्रोः अभवत्।

**अथवा**

पुरा कस्मिश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्। "सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।" किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्।

**प्रश्न-30. अधोलिखित-पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य रूपरेखा, प्रसङ्गसहितं हिन्दी-भाषायां सरलार्थं विधीयन्ताम्। (½+½+2=3)**

मधुर-मञ्जरी-पिञ्जरी-भूत-मालाः
वसन्ते लसन्तीह सरसा रसालाः
कलापाः ललित-कोकिला-काकलीनाम् ।।
निनादय नवीनामये वाणि! वीणाम्
मृदुं गाय गीतिं ललित-नीति-लीनाम् ।।

**अथवा**

जटायो पश्य मामार्य ह्रियमाणामनाथवत्।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा।।

**प्रश्न-31. रेखाङ्कितपदमाधृत्य अधोलिखित-वाक्यानां प्रश्ननिर्माणं कुरुत। ½×4=2**

**(क)** श्वेतकेतुः **वाग्विषये** पृच्छति।
**(ख)** तपोदत्तः **अक्षरज्ञानं** विनैव वैदुष्यमवाप्तुम् अभिलषति।
**(ग)** सभ्यैः तौ परस्परं संबोध्य **तुला-शिशु-प्रदानेन** सन्तोषितौ।
**(घ)** लुब्धा वृद्धा **स्वर्णकाकस्य** रहस्यमभिज्ञातवती।

**प्रश्न-32. अधोलिखितेषु पदयुग्मेषु एकं विशेष्यपदम् अपरञ्च विशेषणपदम्। विशेषणपदम् विशेष्यपदं च पृथक् पृथक् चित्वा लिखत- ½×4=2**

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| **(क)** खिन्नः बालः | ..................... | ..................... |
| **(ख)** पलायमानं श्वानम् | ..................... | ..................... |
| **(ग)** प्रीतः बालकः | ..................... | ..................... |
| **(घ)** त्वरमाणाः वयस्याः | ..................... | ..................... |

*********************************************************

## कक्षा नवमी

### आदर्शप्रश्नपत्र-प्रारूप-रूपरेखा

### HPBOSE DHARAMSHALA

### शिक्षा-सत्र- 2026-2027

**समयः होरात्रयम्** **विषयः संस्कृतम्** **पूर्णांकाः 80**

---

**खण्डविभाजनम्**

| | | |
|---|---|---|
| खण्ड 'क' | "बहुविकल्पात्मक-प्रश्नाः" | 16 अङ्काः |
| खण्ड 'ख' | "अपठित-अवबोधनम्" | 10 अङ्काः |
| खण्ड 'ग' | "रचनात्मक-कार्यम्" | 10 अङ्काः |
| खण्ड 'घ' | "अनुप्रयुक्त-व्याकरणम्" | 24 अङ्काः |
| खण्ड 'ङ' | "पठित-अवबोधनम्" | 20 अङ्काः |
| | कुल-अङ्काः | 80 अङ्काः |

**खण्ड 'क'**

**बहुविकल्पात्मक-प्रश्नाः (1×16=16)**

प्रथमतः षोडशपर्यन्तं बहुविकल्पात्मक-प्रश्नाः भविष्यन्ति, तत्रापि पञ्च प्रश्नाः "शेमुषी प्रथमो भाग:" इत्येतम् अधिकृत्य, दश प्रश्नाः व्याकरणम् अनुसृत्य तथा च एकं प्रश्नं संस्कृतस्य सामान्य- बिन्दूनां भविष्यति।

प्रश्न-1. "शेमुषी प्रथमो भाग:" इत्यस्य संस्कृत-पाठ्यपुस्तकस्य कस्यचिद् एकस्य पाठस्य नाम।

प्रश्न-2. "शेमुषी प्रथमो भाग:" इत्यस्य प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।

प्रश्न-3. "शेमुषी प्रथमो भाग:" इत्यस्य प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।

प्रश्न-4. "शेमुषी प्रथमो भाग:" इत्यस्य षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।

प्रश्न-5. "शेमुषी प्रथमो भाग:" इत्यस्य षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।

प्रश्न-6. प्रकृति-प्रत्यययोः संयोजनं विभाजनं वा (तद्धिताः स्त्रीप्रत्ययाः च)।

प्रश्न-7. प्रकृति-प्रत्यययोः संयोजनं विभाजनं वा (कृदन्ताः)।

प्रश्न-8. वाच्यस्य नियमानुगुणं समुचितं वाच्य-परिवर्तनम्। (कर्तृवाच्यात् कर्मवाच्ये परिवर्तनम्)

प्रश्न-9. वाच्यस्य नियमानुगुणं समुचितं वाच्य-परिवर्तनम्। (कर्मवाच्यात् कर्तृवाच्ये परिवर्तनम्)

प्रश्न-10. सन्धिम्/सन्धिविच्छेदम् वा।

प्रश्न-11. वाक्याधारित-शब्दरूपाणां चयनम्।

प्रश्न-12. वाक्याधारित-धातुरूपाणां चयनम्।

प्रश्न-13. शब्दानां पद-परिचयम्।

प्रश्न-14. धातूनां पद-परिचयम्।

प्रश्न-15. समस्तपदं विग्रहपदं वा चिनुत।

प्रश्न-16. सामान्य-संस्कृतस्य मूलभूत-परिचयात्मक-बिन्दूनां ज्ञानम् (लिङ्ग- विभक्ति- वचन- पुरुष- कारकादि)।

**खण्ड 'ख'**

**अपठित-अवबोधनम्**

**(अपठित-सरलगद्यांश-आधारित-कार्यम् :- एकः गद्यांशः)**

**प्रश्न-17. 120-200 शब्द-परिमितः एकः अपठितः सरल-गद्यांश: (सरलकथा प्रसिद्ध-घटना वर्णनं वा)**

**(1) एकपदेन प्रश्नोत्तर-द्वयम्       1×2=2**

**(2) पूर्णवाक्येन प्रश्नोत्तर-द्वयम्       1×2=2**

**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-त्रयम्)       1×3=3**

**(4) गद्यांशस्य समुचित-शीर्षकम्       1×1=1**

**(5) गद्यांशस्य तृतीयांश-तुल्यं सारम्।  2×1=2**

**भाषिक-कार्यम् =>**

**वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च।**

- **विशेषेण ध्यातव्यम्-**

**बोर्ड परीक्षायां अपठितगद्यांश: एव भविष्यति, यः कस्यापि सहायतापुस्तकेषु विद्यमानः (लिखितः) न स्यात्। एतत् परीक्षा-पत्र-निर्मातुः उत्तरदायित्वं वर्त्तते।**

**खण्ड 'ग'**

**रचनात्मक-कार्यम्**

**प्रश्न-18. सङ्केताधारित-अनौपचारिक-पत्रम्       ½×10=5**

**प्रश्न-19.निबन्ध-लेखनम् (अनुच्छेद-लेखनम्)       5×1=5**

**खण्ड 'घ'**

**अनुप्रयुक्त-व्याकरणम्**

**प्रश्न-20. प्रत्ययाः (चतुर्णां प्रकृति-प्रत्ययानां संयोजनम् / विभाजनञ्च)       1×5=5**

**(1) कृदन्ताः - तव्यत्, अनीयर्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्।**

**(2) तद्धिताः - मतुप्, इन्, ठक्, त्व, तल्।**

**(3) स्त्री-प्रत्ययौ - टाप्, ङीप्।**

**प्रश्न-21. चतुर्णां वाक्यानां वाच्य-परिवर्तनम् (केवलं लट्लकारे) 1×4=4**

**प्रश्न-22. सन्धि-कार्यम् (चतुर्णां पदानां सन्धिं/सन्धि-विच्छेदं वा) 1×4=4**

**(1) स्वर-सन्धिः => दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूप, पररूप, संयोग इत्यादयः।**

**(2) व्यञ्जन-सन्धिः => श्चुत्व, ष्टुत्व, जशत्व, तुक् आगम, अनुस्वार, परसवर्ण, अनुनासिक, वर्गीय-प्रथम-अक्षराणां तृतीयवर्णे पञ्चमवर्णे वा परिवर्तनम् इत्यादयः।**

**(3) विसर्ग-सन्धिः => विसर्गस्य स्थाने उत्त्वं, रत्वं, लोपः, शकारः, षकारः, सकारः च।**

**प्रश्न-23. कोष्ठेषु प्रदत्तानां शब्दानां वाक्यानुगुणं शब्द-रूपाणां विभक्ति-वचनम् लिखत । (केवलं प्रश्नचतुष्टयम्)**

**प्रश्न-24. निर्देशित-लकारे धातूनां वाक्यानुगुणं पुरुष-वचनम् अधिकृत्य समुचितं पदं लिखत । (केवलं प्रश्नचतुष्टयम्)**

**प्रश्न-25. पद-परिचयः (चतुर्णां शब्दानां धातूनाञ्च पद-परिचयः)। ½×4=2**

**प्रश्न-26. समासाः (वाक्येषु चतुर्णां समस्त-पदानां विग्रहः विग्रह-पदानां च समासः) ½×4=2**

**(1) तत्पुरुषः (विभक्तिः, नञ्, उपपदः),**

**कर्मधारयः तत्पुरुषः (विशेषण- विशेष्यम्, उपमान - उपमेयम्),**

**द्विगुः तत्पुरुषः च।**

**(2) द्वन्द्वः (इतरेतरः, समाहारः, एकशेषः)**

**(3) बहुव्रीहिः (समानाधिकरणम्)**

**(4) अव्ययीभावः (अनु, उप, सह, निर्, प्रति, यथा)**

- **<u>विशेषेण ध्यातव्यम् (final paper setter)-</u>**

**परीक्षा-पत्र-निर्माता प्रश्न-20 तः प्रश्न-26 पर्यन्तं ये व्याकरण-सम्बन्धिताः प्रश्नाः सन्ति, तेषां प्रश्नानां निर्माणमपि "शेमुषी द्वितीयो भागः" इति पाठ्यपुस्तकात् एव कुर्यात्, येन पुस्तकस्य अपि महत्ता भवेत्।**

## खण्ड 'ङ'

## पठित-अवबोधनम्

**("शेमुषी-द्वितीयो भागः" इति संस्कृत-पाठ्यपुस्तकम् अधिकृत्य पठित-अवबोधनम्)**

**{पाठ्यसामग्री- प्रथमपाठतः दशमपाठ-पर्यन्तम्}**

**पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्**

**प्रश्न-27. 40-50 शब्द-परिमितः एकः पठित-गद्यांशः**

**(संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)**

**(1) एकपदेन प्रश्नोत्तरद्वयम् 1×2=2**

**(2) पूर्णवाक्येन एकं प्रश्नोत्तरम् 1×1=1**

**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तरद्वयम्) 1×2=2**

**प्रश्न-28. एकः पठितः पद्यांशः (संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)**

**(1) एकपदेन प्रश्नोत्तरद्वयम्  1×2=2**

**(2) पूर्णवाक्येन एकं प्रश्नोत्तरम्  1×1=1**

**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तरद्वयम्)  1×2=2**

**भाषिक-कार्यम् (प्रश्न-29 एवं प्रश्न-30 कृते)=>**

**वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च।**

## संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य हिन्दी-भाषायाम् अनुवादः।

**प्रश्न-29. एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः)  (½+½+2=3)**

**प्रश्न-30. एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः)।  (½+½+2=3)**

**प्रश्न-31. रेखाङ्कित-पदमधिकृत्य चतुर्णां वाक्यानां प्रश्ननिर्माणम्।  ½×4=2**

**प्रश्न-32. संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्र्याः अभ्यासमधिकृत्य चतुर्णां पदानां मेलनम् । अभ्यासेषु एतादृशाः अनेके विषयाः सन्ति, तद्यथा-  ½×4=2**

**> पर्यायपदानां (समानार्थक-पदानां) मेलनम्।**

**> विलोमपदानां (विपरीतार्थक-पदानां) मेलनम्।**

**> विशेषण-विशेष्यानां मेलनम्।**

**> कोष्ठकात् चित्वा पदानाम् अर्थः।**

**> शुद्ध-कथनानां समक्षम् "आम्" इति तथा अशुद्ध-कथनानां समक्षम् "न" इति लेखनम्।**

**> कोष्ठकात् शुद्धं विकल्पं विचित्य रिक्तस्थानपूर्तिः।**

**परीक्षा-पत्र-निर्माता एतेषु विषयेषु कमपि एकं विषयम् अधिकृत्य प्रश्नं प्रष्टुं शक्नोति।**

************************************************************